योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०१०

दशमः सर्गः १०

श्रीवसिष्ठ उवाच ।

तस्मान्नकिंचिदेवेदं जगत्स्थावरजंगमम् ।

नकिंचिद्भूततां प्राप्तं यत्किंचिदिति विद्धि हे ।। १

यत्र काचिन्न कलना भावाभावमयात्मिका ।

तदिदं राम जीवादि सर्वं व्यर्थं किमीहसे ।। २

संबन्धोऽयमसावन्तर्हृदि यो व्यपदिश्यते ।

न तं लभामहे सर्पं रज्जुसर्पभ्रमादिव ।। ३

अपरिज्ञात आत्मैव भ्रमतां समुपागतः ।

ज्ञात आत्मत्वमायाति सीमान्तः सर्वसंविदाम् ।। ४

अविद्येत्युच्यते लोके चिच्चेत्यमलमाश्रिता ।

चेत्यातीतात्मतामेति सर्वोपाधिविवर्जिता ।। ५

चित्तमात्रं हि पुरुषस्तस्मिन्नष्टे च नश्यति ।

स्थिते तिष्ठति चात्मायं घटे सति घटाम्बरम् ।। ६

गच्छन्पश्यति गच्छन्तं स्थितं तिष्ठञ्छिशुर्यथा ।

भ्रान्तमेवमिदं चेतः पश्यत्यात्मानमाकुलम् ।। ७

कोशकारवदात्मानं वासनातनुतन्तुभिः ।

वेष्टयच्चैव चेतोऽन्तर्बालत्वान्नावबुध्यते ।। ८

श्रीराम उवाच ।

मौर्ख्यमत्यन्तघनतामागतं समवस्थितम् ।

स्थावरादि तनु प्राप्तं कीदृशं भवति प्रभो ।। ९

श्रीवसिष्ठ उवाच ।

अमनस्त्वमसंप्राप्तं मनस्त्वादपि च च्युतम् ।
तटस्थं रूपमाश्रित्य स्थितैषा स्थावरेषु चित् ।। १०
तत्र दूरस्थिता मुक्तिर्मन्ये वेद्यविदां वर ।
सुप्तपुर्यष्टका यत्र चित्स्थिता दुःखदायिनी ।
मूकान्धजडवत्तत्र सत्तामात्रेण तिष्ठति ।। ११
श्रीराम उवाच ।
सत्ताद्वैततया यत्र संस्थिता स्थावरेषु चित् ।
तत्रादूरस्थिता मुक्तिर्मन्ये वेद्यविदां वर ।। १२
श्रीवसिष्ठ उवाच ।
बुद्धिपूर्वं विचार्येदं यथावस्त्ववलोकनात् ।
सत्तासामान्यबोधो यः स मोक्षश्चेदनन्तकः ।। १३
परिज्ञाय परित्यागो वासनानां य उत्तमः ।
सत्तासामान्यरूपत्वं तत्कैवल्यपदं विदुः ।। १४
विचार्यार्यैः सहालोक्य शास्त्राण्यध्यात्मभावनात् ।
सत्तासामान्यनिष्ठत्वं यत्तद्ब्रह्म परं विदुः ।। १५
अन्तः सुप्ता स्थिता मन्दा यत्र बीज इवाङ्कुरः ।
वासना तत्सुषुप्तत्वं विद्धि जन्मप्रदं पुनः ।। १९
अन्तः संलीनमननं परितः सुप्तवासनम् ।
सुषुप्तं जडधर्मापि जन्म दुःखशतप्रदम् ।। १७
स्थावरादय एते हि समस्ता जडधर्मिणः ।
सुषुप्तपदमारूढा जन्मयोग्याः पुनःपुनः ।। १८
यथा बीजेषु पुष्पादि मृदो राशौ घटो यथा ।
तथान्तः संस्थिता साधो स्थावरेषु स्ववासना ।। १९
यत्रास्ति वासनाबीजं तत्सुषुप्तं न सिद्धये ।
निर्बीजा वासना यत्र तत्तुर्यं सिद्धिदं स्मृतम् ।। २०
वासनायास्तथा वह्नेर्ऋणव्याधिद्विषामपि ।

स्नेहवैरविषाणां यः शेषः स्वल्पोऽपि बाधते ।। २१

निर्दग्धवासनाबीजसत्तासामान्यरूपवान् ।

सदेहो वा विदेहो वा न भूयो दुःखभाग्भवेत् ।। २२

चिच्छक्तिर्वासनाबीजरूपिणी स्वापधर्मिणी ।

स्थिता रसतया नित्यं स्थावरादिषु वस्तुषु ।। २३

बीजेषूल्लासरूपेण जाड्येन जडरूपिषु ।

द्रव्येषु द्रव्यभावेन काठिन्येनेतरेषु च ।। २४

भस्मन्यथानित्यरूपा पांसुष्वप्यणुरूपिणी ।

असितेष्वसितस्थित्या सितधारतयासिषु ।। २५

आत्मा शक्तिः पदार्थेषु तथा घटपटादिषु ।

सर्वत्र सत्तासामान्यरूपमाश्रित्य तिष्ठति ।। २६

इतीयमखिला दृश्यदशामापूर्य संस्थिता ।

यथा घटापटा प्रावृडम्बरालम्बिनी तथा ।। २७

स्वरूपमस्याश्चैवैतत्कथितं प्रविचारितम् ।

असर्वं सर्वतो व्यापि सदिवासन्मयात्मकम् ।। २८

आत्मदृष्टिरदृष्टैषा संसारभ्रमदायिनी ।

दृष्टा सती समग्राणां दुःखानां क्षयकारिणी ।। २९

अस्यास्त्वदर्शनं यत्तदविद्येत्युच्यते बुधैः ।

अविद्या हि जगद्धेतुस्ततः सर्वं प्रवर्तते ।। ३०

अविद्या रूपरहिता यावदेवावलोक्यते ।

तावदेव गलत्याशु तुहिनाणुर्यथातपे ।। ३१

यथा नरो गलन्निद्रो यावत्कलनया मनाक् ।

विमृशत्याशयं तावन्निद्रा तस्य विलीयते ।। ३२

यथा कीदृगवस्त्वेतदिति यावद्विकल्प्यते ।

अविद्या क्षीयते तावदालोकेनान्धता यथा ।। ३३

दीपहस्तो यथाभ्येति तमोरूपदिदृक्षया ।

तथा विलीयते सर्वं तमस्तापैर्घृतं यथा ।। ३४

नच संलक्ष्यते दीपे तमसो रूपनिश्चयः ।

उदेति केवलं ध्वान्तध्वंसो विमलमूर्तिमान् ।। ३५

एवमालोक्यमानैषा क्वापि याति पलायते ।

असद्रूपा ह्यवस्तुत्वाद्दृश्यते ह्यविचारणात् ।। ३६

आलोक आगते यादृक्तमस्तद्दृश्यते तथा ।

याऽवस्तुत्वे त्वविद्यायास्त्ववस्तुत्वं प्रतीयते ।। ३७

यावन्नालोक्यते तावन्न किंचिदपि दृश्यते ।

आलोकिते यथाऽविद्या तत्तथा प्रतिपद्यते ।। ३८

रक्तमांसास्थियन्त्रेऽस्मिन्कः स्यामहमिति स्वयम् ।

यावद्विचार्यते तावत्सर्वमाशु विलीयते ।। ३९

आद्यन्तयोरसद्रूपे नूनं परिहृते हृदा ।

सर्वस्मिन्नेव यः शेषस्तमविद्याक्षयं विदुः ।। ४०

तन्न किंचिच्च किंचिद्वा तत्सद्ब्रह्मैव शाश्वतम् ।

तद्वस्तु तदुपादेयं यदविद्या निवर्तते ।। ४१

रूपं स्वनाम्न एवास्या ज्ञायते निःस्वभावकम् ।

नहि जिह्वागतस्वाद्यस्वादोऽन्यस्मात्प्रतीयते ।। ४२

नाविद्या क्वचिदप्यस्ति ब्रह्मैवेदमखण्डितम् ।

सदसत्कलनास्फारमशेषं येन मण्डितम् ।। ४३

एतावदेवाविद्याया नेदं ब्रह्मेति निश्चयः ।

एतदेव क्षयो यस्या ब्रह्मेदमिति निश्चयः ।। ४४

घटपटशकटावभासजालं

न विभुरितीत्युदितेह सा त्वविद्या ।

घटपटशकटावभासजालं

विभुरिति चेद्गलितैव सा त्वविद्या ।। ४५

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये देव० मोक्षोपायेषु निर्वाणप्रकरणे पू० अविद्याचिकित्सा नाम दशमः

सर्गः ।। १० ।।